Semester-II, CC-4, Sec-C, Gita: Self management through devotion. (XII.19)

प्रश्नः – अधस्थितस्य श्लोकस्य प्रसङ्गोल्लेखपूर्वकं संस्कृतेन देवनागरलिप्या च व्याख्यानं कुरुत।

उत्तरम् –

तुल्यनिन्दास्तुतिर्मौनी सन्तुष्टो येन केनचित्।

अनिकेतः स्थिरमतिर्भक्तिमान् मे प्रियो नरः॥ (गीता - १२.१९)

महर्षिवेदव्यासविरचितायाः श्रीमद्भगवद्गीतायाः भक्तियोगाभिधेयात् द्वादशाध्यायात् समाचितमिदं प्रस्तुतं पद्यप्रसूनम्।

भगवद्भक्तानां गुणराशिं वर्णयन् आह भगवान् श्रीकृष्णः "तुल्यनिन्दास्तुतिर्मौनी ....." इति।

तुल्यनिन्दास्तुतिः निन्दायां स्तुतौ च एकरूपः, मौनी वाक्संयमयुक्तः, येन केन चित् सन्तुष्टः यत्किञ्चिल्लाभेन तुष्टिमान्, अनिकेतः स्थाय्यावासहीनः, स्थिरमतिः स्थिरबुद्धिः, भक्तिमान् भक्तियुक्तः मे प्रियः नरः मम प्रीतिभाजनम् जनः इति सान्वयप्रतिपदार्थाः।

पूर्ववर्तिषु केषुचित् श्लोकेषु भगवता श्रीकृष्णेन भक्तस्य प्रियजनस्य लक्षणं वैशद्येन प्रतिपादितम्। तस्मिन् एव प्रसङ्गे अत्रापि भगवता श्रीकृष्णेन उच्यते, निन्दायाम् प्रशंसायाम् च यः जनः समभावसम्पन्नः, यश्च पुरुषः वाक्संयमयुक्तः स एव भगवतः प्रीतिभाजनम् भवति। निन्दायाम् दुःखितस्य , प्रशंसायाम् हृष्टस्य न भगवत्प्राप्तिः। वाक्संयमहीनोऽपि भगवतः न प्रीतिभाजनम्। एवं यस्य बहुलाभे आकाङ्क्षा वर्तते तस्य कृतेऽपि मोक्षो न सम्भवति। परन्तु यः पुरुषः यत्किञ्चिल्लाभेन सन्तुष्टः भवति, निर्दिष्टवासस्थानविहीनः, स्थिरबुद्धिश्च भवति स भगवतः प्रियः भक्तो भवितुम् अर्हति। परन्तु सर्वोपरि भक्तिस्तु भगवत्प्राप्तौ सर्वोत्तमो हेतुः। यस्य भक्तिः नास्ति तस्य कृते श्रीकृष्णप्राप्तिः नैव सम्भवति। शास्त्रेषु उच्यते - 'भक्तिमिच्छन्ति देवताः'

इति। अतएव भक्तिमान् पुरुषः एव भगवतः प्रीतिभाजनम् भवति। तस्मात् साक्षात् भगवता उच्यते, ‘भक्तिमान् मे प्रियो नरः’ इति शिवम्॥